योरेकादशसैकषष्टिमात्रात्मकाकरभी । अत्र सप्तस्वपि द्विहा रूपः पद्यः पादः स्यादेवेति ध्येयं । १ । यस्याः प्रथमतृतीय
पंचमपादेषु चतुर्दशमात्राः द्वितीयतुर्ययोरेकादशसा चतुःषष्टिमात्रात्मकानंदा । २ यस्या विषमेषु पादेषु एकोनविंशतिः षु
समयोरेकादशसैकोनाशीतिमात्रात्मका मोहिनी । ३ यस्या विषमेषु पंचदश समयोरेकादश सा सप्तषष्टिमात्रात्मका चारुसेना ४
यस्या विषमेषु षोडश समयोर्द्वादश सैकोनसप्ततिमात्रात्मका भद्रा ५ यस्या विषमेषु पंचदश द्वितीये द्वादश । तुर्ये एका
दश सा षष्टिमात्रात्मका राजसेना ६ यस्या विषमेषु षोडश समयोर्द्वादश एकादश वा सा तालंकी ७ इति । यत्रादौ द्विगुरुस्ततश्चतुर्लघु
स्ततश्चाद्विगुरुस्ततएते एवं पुनरेवं प्रतिपादं द्वात्रिंशन्मात्राः स्युः । ज्ञयते प्राधान्यं । तेन नत्रिभं ।७। सकरुत्रात्रकुत्रापि
नो

पादे जगणो नान्य इति। यत्र समस्तमष्टचत्वारिंशन्मात्रात्मके दोहार्द्धे पूर्णा छं। समस्तं भवति मात्राकं काव्यं छंद। यत्र
राई सा चतुश्चत्वारिंशदधिकशतमात्रका षट्पदा कुंडलिका। यत्र प्रतिपादं पंचविंशतिमात्राभिर्विंशा [illegible] तद्गनौ
तत्रादौ चतुष्कल एक ततो नेयथाक्रमं गणाः स्युः। यत्र निरंतरं लघवो गुरव एव न स्युरिति। यत्रादौ षट्कलस्ततश्चत्वार
श्चतुष्कलास्ततः षट्कल इत्येवं विंशतिर्मात्रात्मिका द्विपदी छंदः। यत्र न व सर्वलघवो तेर गणाः त [illegible] जा छंदः। यत्र सर्वलघव
षट्पंते गणाः [illegible] पंचविंशतिमात्राके प्रथमदले द्वितीयदले च सर्वलघवः स्युस्ततो जगणश्चेति द्वात्रिंशन्मात्रास्ता द्वि
रगाईदं यत्राद्ये नवचतुष्कलास्ततो रगणस्ततो द्विगुरू इति षट्चत्वारिंशन्मात्रा। द्वितीयार्द्धे [illegible] मत्र विंश
तिमात्राकं ततः सप्ततिमात्रात्मके मालाछंदः। यत्राष्टचत्वारिंशन्मात्राके दोहायाश्चार्द्धे द्वयोति लघुगुरू लघु द्वयं इत्येवं रू
पः पंचकलस्तद् दृष्टे पंचाशन्मात्राके चुलिकाछंदः। यत्र दोहाया द्वितीयः पादः प्रथमः प्रथमो द्वितीयः तृतीयस्तृतीयस्तु
रीयस्तुरीयस्तु सोरठा छंदः। यत्र सर्वलघव एव न स्तो [illegible] यस्ततो गुरू इति चतुर्दशमात्रास्ता माकलि छं।
यत्रादौ चतुष्कलस्ततो जगणस्तन्मधार छंदः। यत्र सर्वपादे एकादशमात्रा लेखा अं ते त गणयुतास्ततश्चत्वारिंश
न्मात्राकं माभीर छंदः। यत्र प्रतिपादं द्वात्रिंशन्मात्रास्तत्र दंडकलं तत्र केवलं गुरवो लघवो वा न कार्याः। यत्रादौ चतुष्क
लस्ततो पंचकलस्ततो लघुरिति चतुर्ष्वपि पादेषु दीपके। यत्र चत्वारः सर्वलघवः यगणो वा प्रतिपादं पादांते तु स
गणएव तत्सिं [illegible] विलोकि छंद। यत्र चतुर्ष्वपि पादेषु त्रयः षट्कलास्ततो लघुर्गुरुश्चैक कस्तत्संयोगमि छंदः। यत्र पादे चतु १२
तुष्के ऽष्टौ च चतुष्कला नतु वर्णैर्लघुनि पदः किंतु द्वात्रिंशन्मात्रा नियमस्तल्लीलावती छंदः। यत्र पादे षोडश
पंचकलस्ततः षट्कलस्ततस्त्रयः पंचकलास्ततः एको गुरुरेवमष्टाविंशतिमात्रास्तद्वृत्ता छंदः। यत्र चतुर्षु
पादेषु षोडश [illegible] गुरवस्तु मिरष्ट [illegible] यतिरंते गुरुश्चैवं द्वात्रिंशन्मात्रास्तित्रिभंगी छंदः। अत्र जगणो न कार्यः।

विने तर्थः॥

यत्र चतुर्ष्वपि पादेषु उपांते शमिरष्टभिश्चतुर्दशभिश्च यतिः पादे२ द्विगुरू श्चैवं द्वात्रिंशन्मात्रास्तद्दुर्मिला छंदः।
यत्र चतुःपादेषु त्रयः षट्कलास्ततो रगणस्ततो गुरुरेवं त्रयोविंशतिमात्रास्तं हीरकं छंदः। यत्र चतुर्षु पादेषु सप्त
चतुष्कलास्ततः सगणः दशाष्टपंचनवभिर्यतिश्चैवं द्वात्रिंशन्मात्रास्तज्जनहरणं छंदः। यत्र लघुद्वयं ततो नव
चतुष्कलास्तत एको गुरुरेवं चत्वारिंशन्मात्राः प्रतिपादं यतिश्च दिग्वसुसुचनवसुभिस्तन्मदनगृहं छंदः। यत्र
चतुःपादे षोडशषट्कलस्ततः पंचचतुष्कलास्ततो [illegible] गुरु [illegible] स्ततो लघुः यतिस्तु दिक्वसु
रुद्रैस्तन्महाराष्ट्रं छंद इति दिक्॥ अथ छंदसां लक्षणं ज्ञात्वं मंतरेणापि गुरुवर्णलघुमात्रे यत्ताज्ञानोपायमाह।
वृत्तस्य लाविना वर्णैर्गाविर्णगुरुभिस्तथा। गुरवो लैर्द्दले नित्यं प्रमाणमिति निश्चितं। वृत्तस्येति सर्वत्रान्वेति।
वृत्तस्य लालघुसंख्या वर्णैर्वर्णसंख्यातो विना वियुक्ता कार्या इति सर्वत्राध्याहीयते। ततउर्वरिता गा गुरुसंख्या स्या
त्। तथा वर्णा वर्णसंख्या गुरुभिर्गुरुसं [illegible] ख्यया विना कार्या ततउर्वरिता ला लघुसंख्या स्यात्। गुरवो गुरुसंख्या
लैर्लघुसंख्यया निसंसहभूतासती वर्णा वर्णसंख्या स्यात्। दलेरति। गुरवो लैरिमनुवर्तंते। गुरवो गुरुसं
ख्या दले द्विगुणी कृता लेहृते सति लैर्लघुसंख्यया निसंसहभूतासती [illegible] त्रा [illegible] संख्या
र्थः। इत्यमुना प्रकारेणापरीक्षणान्निश्चितं गुरूवर्णलघुमात्रेयत्ताज्ञानमिति शेषः। अपत्र लादिशब्दास्तत्त
संख्यालक्षकाज्ञेयाः। लक्ष्ये चैतदेवं पश्ये। तथाहि। अस्मिन्पद्ये त्रयोदश लघवो द्वात्रिंश [illegible] संख्यया वियु
क्ता एकोनविंशतिर्गुरवः स्युः। द्वात्रिंशद्वर्णा एकोनविंशत्या गुरुभिर्वियुक्तास्त्रयोदश लघवः। एकोनविंश
तिर्गुरवस्त्रयोदश लघवो संभूय द्वात्रिंशद्वर्णाः स्युः। एकोनविंशतिर्गुरवो द्विगुणीकृता अष्टत्रिंशत्

त्रयोदशभिर्लघुभिश्च संयुक्ते एकपंचाशन्मात्रः स्युरिति ॥ केचित्तु पाठाकुलकमिति दशभिः श्लोकैः पठंति तत्क्र मोऽपीति ग्रस्तः लक्षणलक्षणानि तिरिक्तस्य स्यास्य मध्ये निरूपणस्यान्याय्यत्वात् अत एवाध्यायांतपाठः सं धीयान्॥ अग्रिमाध्यायनिरूपणे तेषामपि देहलीदीपन्यायेनोपयोगस्य चान्यार्थश्च । सूत्रकृतापि अयमेव क्रमो विहितः । जातीनिरूपणाध्यायो द्वितीयो गुर्वनुग्रहात् । रत्नोद्दयरामस्य प्रारब्धागोचरता भगवती अस्मिन्नध्याये ग्रंथसंख्या । सपादद्वात्रिंशत्श्लोकाः अत्राक्षराणि चेति ॥ इति श्रीवृत्तरत्नाकरविवृतौ द्वितीयोऽध्यायः ॥ ॥ अथ तृतीयेऽभाष्यं तदुक्तादीनां समाभिधाः ॥ एकैकवर्धितवर्णा चंद्राग्निनेत्रशैलाग्निपर्वताः मनु द्वाविंशतिगिरिरसेषु वह्निरसेंदवः ॥ नेत्राग्निचंद्रचंद्राग्निदस्रेंदुदस्रा इति क्रमात् २ । स्वकीयग्रंथबाहुल्यभी तेश्चोपेक्षितान् पि भेदान् प्रसिद्धितः कांश्चित्वक्ष्येऽस्य ग्रंथदर्शनात् । अथोद्देशक्रमप्राप्तानि समवृत्ता नि लक्षयति उक्ता । अत्र उक्ताबंधे जातिरेकगुर्वक्षरपादा चेत्तदा श्रीनाम्नी स्यादित्यभ्याहरेणयोज्यं । एवमग्रेपि । एवं चयत्तु गुं श्री इति पठितं लक्षणलक्षणयोरेकेन पादेना संग्रहाद् द्वितीयोदाहरणमेतदिति तद्वि चारणीयं । अत्रेदं बोध्यं । यत्र यतिर्नोक्ता तत्र स्वपूर्वोक्तवृत्ते ज्ञेया तत्र्वाप्यनुक्तो पादांते इति । अत्युक्ता जौ स्त्री १ इदं कामइति केचित् अत्रोपेक्षितानि । लक्ष्मधु ॥ लक्ष्म हीर्गिर्लक्ष्मा ॥ मध्या ३ मो नारी \ प्रतिष्ठा मगणान्वे तदा नारी नाम्नी स्यात् । १ रो मृगी २ अत्रोपेक्षितानि । शशीयः \ तालीमः । २ प्रियो नो इंस्त्र २०
इति । २ इदं तालीति केचित् २

---



मगणः । ५ त्रा नारोनायाहि । तनरेंद्रमवेहि । मृगेंद्रमेवचति । नकमलमयतु २ । प्रतिष्ठा । गौ चेत्कन्या । नागादि तिपाठांतरं । इयं तीर्णेति केचित् । अत्रोपेक्षितानि । यगो श्रीडा १ धारि रलौ च २ । जासेयुता नगाणिका । ३ । सुप्रतिष्ठा ५ नौ गिति पंक्तिः १ [illegible] उपेक्षितानि । समोहनो सो । हारीतगा श्रीलंब ४ भेनहंस्त ६ स्थः । सनलान नु यमकामिति इति । गायत्री ६ त्यौ स्तन् तनुमध्या १ यौ वदसुमती । २ शशिवदनानौ रं अत्रापेक्षितानि । यवौ सोमराजी । इयं शं खनारीति केचित् । श्यामः सो तु कुलं । सम्प्रात्योस्त्रा ग्धिणी ३ इयं विमोहेति केचित् । विद्युल्लेखा मोमः ४ इयं शे षेति केचित् । तिलका सुभ्रम ५ । सुमालतिका जस्त्री । ६ द्विजगणयुत दमनकमिह ७ । उष्णिक् ७ म्रौ गः स्यान्मद लेखा । १ कुमारललिता ज्सौ ग् २ । अत्र धाम्भीः चभिश्चयतिरिति केचित् । अत्रोपेक्षितानि । मधुमदि ननगाः । स रगा हंसमाला । [illegible] । चूडामणिस्त भगाः २ । रोजौ यमानिका ४ । जलमितियवासक महर ललाहरा । पा न्म णे धुरकेहि । चि । ५ रो सा दीर्घमाणेगः ७ अनुष्टुप् ८ । मौ गिति वितिचित्रपदाः । ७ । मो मो गो गो विद्युन्माला । अत्र चतुर्भिश्चतुर्भिर्यतिरितिवृत्तिः २ । माणवकं भात्तलगाः ३ । मां इदं माणवकक्रीडितकं इति पिंगलः । यतिः पू र्ववत् । ३ ग्मौ गो हंसरुतमेतत् ४ । जौ समानिका गलौ च । ५ इयं मल्लिकेति केचित् । प्रमाणिका जरौ लगौ । ६ अस्य नाराचेत्यपरे इति वृत्तिः । प्रमाणैव प्रमाणिका । एवं समानिके सपि । अपि च लयोः पिंगलेन सिद्धितिसमा नीति । लोति प्रमाणीतिचगुरुलघ्वोर्लघुगुर्वोश्च क्रमेण वृत्तानि निष्पत्तिरुक्ता । अतुनेवम तैतपापिमूलोनो स्पतत्रैवपर्यवसादाचः पेशमात्रैः इदं अतो नविरोधः ८ । वितानमाभ्यां यदन्यत् ७ । आभ्यां चित्रपदाविद्युन्माला माणवकहंसरुताभ्यां समानी प्रमाणीभ्यां च यदन्यत् तद्वितानमाक्रीतितत्वात्तु स्या व्याख्येयं । अन्यथाहि

वृत्तर०९

सकृतादीनामपि पातेन विताननाम वृत्तिरिति यद्वा। एतदुपधानुरोधेन हि सकृतादीनामपि स्यंदनरथवद्भिन्नमित्य परस्य शामुरी कृत्वान परामिधानानुबंध वृत्तानामपि हि नामेति। यद्वा। आद्य अश्व श्री ताभी नामैकदेशन्यायेन विद्युन्माला चित्रपदा समानिका प्रमाणिका वृत्तान्याकारीतव्या दाकारेण संगृह्यमाणवक हि परकृतवृत्ते अकारीतत्वादकारेण संगृह्य प्रमाणिकारांताकारांता पाणिनिरित्यर्थः। इत्यष्टमेच्चेन। उपेन्द्रितानि। कुमारललिता ज्सौगौ१। जेगिजौ नसिंहलेखा २। नाराचकं नरौ लगौ ३। ननगणगगुरुत्तुंगा ४। कमलमिति न्सौ लगौ। ५ इति। इति। २ रान्नसा विहलमुखी १। अत्र त्रिभिः षड्भिश्च यतिरित्याम्नायः। १। भुजगशिशुसृता नौ मः। २। अत्र सप्तभिर्द्विभिश्च यतिः। शशिकृतेति पाठोऽपपाठः। विंशत्वृत्ता सर्वांतानि। उपेन्द्रितानि। नाडिका भवति नौ नरौ। इत्यपि के महलकिका। २। नलनलगुसरिद्धा मिधा। ३ पारतामोनस गणयुगयुगसगणेकमला ४ नरयुगरचितं च बिंबं। तामरसं नजजयुक्तं। ७ रुपामाली माधवी मालिका। ८ इति। पत्रो १०
म्सौ ज्गौ शुद्धविराडिंमतं। भौ जौ चेति पणवनामकं। २। पंचभिः पंचभिर्यतिः। ३ तौरिगो मयूरसारिणी स्यात् मौ सगयुक्तौ रुक्मवतीयं। ४ इयं चेपकमाला तदुक्तं। पादविराजभपुरयुता कुलशोभा सेविय कर्णी स्वरवती हार इव स्तनी चंपकमाला भातितसुवर्णेति। अत्र पंचभिः पंचभिर्यतिरिति कालिदासः। ४ त्रिमत्तामसगयुक्ता ५ अत्र चतुर्भिः षड्भिश्च यतिरिति हलायुधः। ५। नरजगैर्भवेन्मनोरमा। ६ ज्सौ ज्गौ गुरुणैव
२९ सुपात्रिता। ७ द्यामष्टभिश्च यतिरिति पिके। ७। उपेन्द्रितानि। ३ कामहंसीमभनगयुक्ता १। भगजैर्गुरुणा भवेद्वतिः २।

२।

ससस्सा भवति प्रतिमाग्रः। ३। वाणी विदितात नौ रगौ स्यात्। ४। सजसा गुरुर्भवति माला। ५ मत्रयगौ रुक्मवती। ६। तौ जौ भगुरु प्रोक्ता सुरवमा। ७ नजनगवो मृतगतिका। ८। इति। त्रिष्टुप्। १९ तत्रादिंद्रवज्रायदि तौ जगौ गः। १ उपेंद्रवज्रा जतजास्ततो गौ। तदुक्तं। पयोधरे हारयुगं दधाना करे मृगांके वलयं दधाना। उपेन्द्रवज्रा भुवनैकसारा विराजते भगवती। इति। अनेनैतयोरीरित लक्षणभाजो। पादयोः याउपजातयस्ताः। इत्युक्तं किल मास्त्वपि मिलिता बुधस्मरंति जातिष्विदमेव नाम। अत्र व्यहितनिरूपितयोः इंद्रवज्रोपेन्द्रवज्रयोः संबंधियत्र कृत्स्नं तदेतौ पादौ यासां जाती नांता उपजाता भिधानाः स्युरित्यर्थः। पाद इति द्विवचनं तु आद्य तृतीययोर्विषमत्वेन द्वितीय तुर्ययोश्च समत्वेन चतुर्णामपि द्वैविध्यात्। एवं च द्विवचन स्पाशक्त्या संभवद् कृतिकत्वे द्विवचनं च लक्षणे द्वयंयोजेन लक्षणयानेयं इति यदुक्तं तद्विचारणीयं। उपजातिभेदास्तु पादाकुलकोक्तरीत्या चतुर्दशज्ञेयाः। इंद्रवंशा तरथलिपादानामन्यजातीनामपि संकरेनामानीति दिशति। इत्युक्तमिति। इत्याह मितिसमकूरयति पानामेवामि अष्टेताः स्युरित्यस्त्वि। स्मरंतीत्यनेनैकविषयोगदर्शनानुरोधो भेतिः। समस्तप्रस्तावे पि प्रभंगा द्वप जातुपन्यासो लाघवार्थः। २। नजजलगैर्गदिता सुमुखी। अत्र पंचभिः षड्भिश्च यतिरिति संप्रदायः। दोधकवृत्तमिदं भभभाद्गौ। ४। शालिन्युक्ता म्तौ तगौ गो

२३

२८१
त्रिलोकैः ।५। तदुक्तं । तत्वाक्षरौ मंडितौ कुंडलेन शंखेन हारं नू पुरं च यु क्तौ । धत्ता युगं चा
मरं चाति भाति शालिन्येषा प्रेयसी पिंगलस्येति । लोकाः ७७ । अत्र सर्वत्राद्यादि निर्देशे
मत्तनिर्देशोयतिरित्यधाहारो बोध्यः ।५ वातो मीर्यं कथिता स्तौन गौगः ।५ म्लौ मौगः स्या
द्भ्रमरविलसितं । ७ रान्नरा विहरथोद्धता लगौ तदुक्तं । हारसंगत पयोधरा करे संख मु
द्रवलयेन संगतं । बिभ्रती कनककुंडलं मुदं कामिनीव कुरुतेरथोद्धता इति । ८ स्वा
गतेति रनभा गुरुयुग्मे तदुक्तं । हारिणी कनककुंडयुक्ता पुष्पयुक्करयुगा लयमीः । व वि
र्णिता हि पतिवक्र शतैयस्वागता हरति कस्य न चेतः । इति ।९। ८ । ननसगगुरुरचि
ता ... ता ।१० वृत्तस्य पाठः पिंगलाद्यसंमतत्वात् ननरलगुरुभिश्चचन्द्रिका ।११ श्येनि
...कार जौ रलौ गुरुर्यदा ।१२ उपस्थितमिदं ज्सौ ता गुकारौ ।१३ पंचर
सैः श्रीभतिनगौ गैः स्यात् ।१४ इयं कुड्मलदंतीमौ क्तिकमालाचेत्त्य
१५ अथोपदितानि । ज्सौ ज्सौ गुरुणा यमुपस्थिता । उपचित्रमिदं
ऽ।।ऽऽ। ।।।ऽऽ श्री रितिवृत्तेनाम ।२ २२

२१

बोर् ऽऽऽ।ऽऽऽ।।ऽऽ चतुर्भिः सगणै रित्यर्थः ५
ससमालगौ ।२। कुपुरुषजनितानतौ रौगौ ३ अपनवसिता न्यौ ज्सौ गु इति ।४। ज्रौ ज
गौ कुमेखलं गुरुश्चेत् ५। द्रैया ... सज्जगागुरुश्चरामा ।५ स्मृभर्स्नागुरुश्च भवति जगा
ग्रथितं समजौ गुरुनिधानं ।८ यभ रान्गौ विदितः ... धकः ।९ ननगैगुरुणा खलु
बंधुः ।१० त्रिनलल गुरचितमदनकः ११ मोमा मोगागश्चे स्यात् मालतीरूपमा । इति १२
जतौ तु वंशस्थमुदीरितं जरौ ।१। स्यादिंद्रवंशा ततजैरसंयुतैः ।२ इह तोटकमंबुधिसैः प्रथि
तं ।३ द्रुतविलंबितमाह नभौ भरौ ।४ इदं सुदरी लक्षे तदुक्तं । कुसुमगंधरसैरतिभूषि
ताचरलसी ... गतनूपुरभूषिता । करसुवर्णलसद्यौ लंबिता स्फुरति कस्य न चेतसि
सुंदरी । इति ।४। प्रमुदितवदना भवेन्नौ च रौ ।५। अत्र सप्तभिः पंचभिश्च यतिः । इयं गौ
री चंचलाक्षी प्रभा नेत्र सन्ये ।५ नयसहितौ न्यौ कुसुमविचित्रा ।६। ... भुजंगप्रया
तं भवेद्यैश्चतुर्भिः ७ रैश्चतुर्भिर्युता स्रग्विणी संमता । ८ इंद्रवंशीधरं इति केचित्
भुविभवेन्नभजरैः प्रियंवदा ।२ धौरैर्भाणि ललितात भौ जसौ १ प्रमिता दुरा सजसगैरुदिता । तदु
क्तं । करपद्मशीर्षवजपामरया कनकद्वयेक वलयास्फुरता । वरवर्णिमीरमिकसेव्यपदा प्रमिता

हृदयराम भंडारी आमकी का पठनार्थं ग्रं १ ५१२ ५४

द्रुतविलंबितवल्लिता ।११। ननभरसहिता मिहितो म्लो ।१२। अभिनवतामरसं नजजाय ।१३। इंद्रवलि
तपदइहलन्ये ।१३। अं श्री जैः स्यात्स्रग्मालाम्नौस्मो ।१४। रगोरहभिः इयं कीर्तोली इत्यन्ये ।१५। चंद्रवर्त्म
निगदंति दनभसैः ।१। इह बूनमालिकानजभयैः स्यात् ।१६। इह भिश्चतुर्भिश्च यति ।१५। चंचाये श्रीना
वैश्वदेवी ममौ यौ ।१७। मुनिशरविरतिनौ म्यौ पुटोयं ।१८। अयमेवाष्टाभिश्चतुर्भिश्च तौ पी पुरहति पिंग
लः ।१९। रसैर्जसूजसौजलौ कुतगतिः ।१९। तौ तौ म ति भि मालामृता ग्रहव श्रौं २०। भवतिनत्ताव धुमा
लतीजरौ ।२१। वंदवरतनुरितन्ये २१ इयं तति रितिकाश्चित् । जैमु इति केचित् ।२१। ततमुदित मि इंतोम्रो
नामतः २२। अथोपेहितानि । द्रुतपदं भवतिनभनजाश्चेत् ।१। जरौजरोयदातदाप्रियाभवेत् । २ इदं वसंत
चामरैरित्यन्ये ।२। भवतिननयौ प्रमाणमाला ।३। स्यात्र जौरयौ प्रधानिकाय दास्तः ।४। नाणन्गौ मौ सा म्र
युतालं लिता ।५। स्या ... नाना ननसावि रचिता ।६। ननरममृषिभिः श्रौरैः प्राधान्यी ।७। विदितोसौ कामरे
यं तो गणेशः ।८। चतुर्भिरंवदमौ मौक्तिकदामर ।९। सौरंग कैतैश्चतुर्भिः यमैतैः हि ।१०। जलनिधिनतर
लमपनिरिति ।११। मोदकवृत्तमिदंश्रुतिभैर्नतु ।१२। तदम्बुपादयुगकुरु नूपुर ... रमा ... कुसुम
द्रुयमाहर सुंदरि सर्वजने कमनोहरिमोदक वृत्तनिदं परिभावय ।१३ इति ॥ ॥ अतिजगती ॥
तुरगरसयतिनैततौगाः क्षमा ।१ इयं चंद्रिकेत्यन्ये । कुटिलगतिरितयरे । 23

सुमंगलीत्यन्ये ।१। भुविनवतिननननगगुरुगौरी ।७। ननननगगुरु इति समाहारद्वंद्वः ।

चतुर्ग्रहैरिहरुचिराजभस्जागाः २ वेदैरंध्रैर्म्तौयसगाम तमयूरं ।३। यमोरौ विख्याता चिंचि
रीकावलीगः ।४। म्नौजौगस्त्रिदशयतिः प्रहर्षिणीयं ।५। सजसाजगौ भवेन्मंजुभाषिणी ।६। अ
त्रपंचभिरष्टाभिश्च यतिः । इयं कनकप्रभेत्यन्ये ।६। अथोपदिहितानि । भुवि विदितानजजारगौ
कुमारी ।१। जरौजरौ गुरुर्भवेन्मतिः प्रसिद्धा ।२। रुतमुनियतिर्विद्युन्मसौ तौ गुरुः ।३। नसर
युगगैश्चंद्रलेखः ... जो कैः ।४। जन्तौ सजौ गो भवति मंदभाषिणी ।५। वेदग्रहैस्तभसजगाः
प्रभावती ।६। सजसाभवेदिह सगौ कुटजारमं ।७। इयं नवनंदिनीत्यन्ये ।७। कुटिलगति
र्न जौ सप्तभिस्वो गुना ।८। इति । ॥शक्करी ।१४। इंदुवदना भसजनैः सगुरुयुग्मैः ।१।
इयं वसंतसुंदरीत्यन्ये ।१। द्विः सप्तच्छिदलोला म्सौ म्नौ गौ चरणे चेत् ।२। द्विवारिति द्विः । द्वि
नि चतुर्थ इति सुच् । सप्त च सप्त चेति सप्त त्येकशेषः । सप्त भिश्छिद् यस्यां सेति वि
ग्रहः । एवमग्रेप्येकपदनिर्देशप्रायेणैकशेषएवं बोध्यः ।२। ननरसलघुगैः स्वरैरपराजि
ता ।३। स्वरैः सप्तभिः नवभिः ।३। ननभतलघुगैः प्रहरणकलिता ।४। म्तौ न्सौ गाव
लोग्रहविरतिरसंबाधा ।५। अलाली डियाणिंच ।५। उदवावसंततिलका तभजाज
५१

जौगः ६ इयं गोभावतीत्येके । सिंहोद्धतेत्यपरे । उद्धर्षणीत्यन्ये । मधुमाधवीतीतरे । ६ । अथो
पेक्षितानि । लक्ष्मीरिति विरामाम्भौ न भौ गुरू युग्मौ । १ नजौ भजौ लौ भागुरू स भवति प्रमदा
इयं क्षितिरिति कश्चित् । कुररीरुतेत्यन्ये । २ नसनरैर्लगौ च रचितैर्सुकेसरी । ३ ननतत २८
गुरुगैः पाङ्क्तयतिर्नदी स्यात् । ४ जजसा यलौ गिति शरस्त्रहेमंजरी । ५ इयं पथ्येति कश्चि
त् । ५ नजभजगैर्गुरुश्च [illegible] वसुभकुमारी । ६ त्रिननगगिति निष्ठ्युयतिस्तुपविद्र्रं । ७
ननौ मध्यपदामायुगदशविरमा म्नौ म्नौ गौ । ८ इदं कुटिलेत्यन्ये । वेदैरसैर्युगैश्च यतिरिति केचित् । ९ म्नौ न्मौ
गौ स्या ज्जलधिरशकैर्हंसश्येनी । १० म्नौ न्सौ ल्गौ स्तो भवति च यदि चंद्रौ तसः । ११ अतिशक्करी । १५ ।
दिहतहस्तलघुरथ गितिशशिकला । १ इयं चंद्रावर्तेत्यन्ये । अत्र स्वरैर्वसुभिश्च यतिरित्याम्नायः । इयी
रसैरंध्रैश्च यतौ मालानागैरश्वैश्च मणिगुणनिकर इति पिंगलः । १ ननमययुतेयं मालिनी भोगिलो
कैः । २ तदुक्तं । द्विजकुसुमसरूपा कर्णतांटकयुक्ता कनककवलयहारैर्मण्डिता शैखयुक्ता । सुललित
रसनासौ नूपुरश्री समेता हरतिरसिकचित्तं मालती कामिनीव । यति जो गिनोऽष्टैः । २ भवति
नजौ भजौ रसहितौ प्रभद्रकं ३ । अत्र लौ कैर्नागैश्च यतिः । इदं सुकेशरमित्यन्ये । ३ लजनानयोश १

२९
कविरति रेला । ४ म्रो म्यौ यौ तौ भवेतां सप्ताष्टभिश्च चंद्रलेखा । ५ । अथोपेक्षितानि । कामक्रीडा ड्ली दोजाति
लामाभ्यां मम्भैर्वा । १ भवतः सजौ सस युता वृषभस्तातो गः । २ चंद्रलेखाभिधारोम्भौ यो विरीम स्वरीगैः । ३
ननतभरत्नतीगैः स्वरैरूपमालिनी । ४ इंदौ भवेत्तभजरैः रसयुतैर्मृदंग जातकैः । ५ राज्ञभध्वितयरैरु इतिरम
णीयकं । ६ अष्टी १६ । अत्रि नगैः स्वराद्द्वसद्भभगजाविलसितं । १ भ्रौ च त्रिनाश्च गश्चेति समासः । अ
त्र स्वरात् परं यतिस्थाने खैश्च नवकै यतिस्थानं । ख शब्दस्य नवसंख्यावाचकत्वे तु खानां छिद्रैः समुपसृ
शेत् इत्यादौ शरीरच्छिद्रवाचकत्वात् शरीरे हि नवैव च्छिद्राणीति ध्येयं । यद्वा । अनतिगवरती लतत्शा
रीरं । धिपू । तस्य खानि छिद्राणि अखानि । स्वरा अत्वानि च तेषां समाहारः स्वरा खं यतिस्थानं
इति शेषः । एवमु[illegible]न्ययथापि स्वरभिन्नविभिश्च यतिरिति हृदयं । तथा च सूत्रं । रूपभगजाविल
सितं भ्रौ नौ भ्नौ स्वरनवको इति । १ नजभजरैः सदा भवति वाणिनीयमुतौ । २ अथात्रोपे
क्षितानि । शैलशिखा मरान्तभभगैर चिताविदिता । १ स्पाद्रत्नयैर्नैगो गुरुः कापि नवर
युवतिः २ अत्र कापी लनेन मात्रा मात्रा हादिकभ्यति । कार्ये तिसूच्यते । २ नज्जरभभैर्नगे नच
चामरं रजार जोजवद्धारसैर्युतौ । ३ भ्रमरावलिकासगणैः शरवांरमयेत् । ८ मनहंसरुत
मिंदसजौ जभरायदा । ६ अतिमितनगणसहितमगणमरभः । ९ चेद्रुता भारयहितास्तु नि
शिपालकं । १० इति । ५४ ।

स्यान्मणिकल्पलता ३ । पंचभकारकृता यगतिर्यदि चेत् गुरू । ४ । इदं नीलमिति केचित् । ४ । लघु
गुरू निरंतरं यत्र तस्य पंचचामरः । ५ । इदं नाराचमिति केचित् । ५ । चित्रसंज्ञमीरितं रजौ रजौ रगौ च वृ
त्तौ । ६ । अत्रांते लघुश्चेन्नाराचं चलेति केचित् । ५ । संकथिता भरौ नरौ नगौ श्च वीरललिता । श्रुति
त अष्टी (१७) रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी । १ । जसौ जसयला वसुग्रहयति
श्च पृथ्वी गुरुः २ । पयोधरयुतास्फुरत्कनकयुग्मताटंकिनी सुवर्णरुचिकंकणललितमावबभूपुरा ।
सुगंधरुचिरालसद्भुवनरूपवत्कुंडलामुजंगपतिवर्णिता हरति ते तदाधीमनः । २ दिग्मुनिर्वंशपत्रपतितं भर
नभनलगैः ३ । दिग्मुनयश्चेतेषां समाहारो दिग्मुनि यतिस्थानं इति । ३ । रसयुगहयैन्सौ म्रौ स्लौ गो यदा हरिणी तदा । ४
द्विजवरमुखी भास्वरस्रूपा ससकुंडलकर्णिका ललिता । वलयाहारोत्कृष्टापरा धरभूषिता । कनकरसनारावैर्युक्ता ल
सद्वरनूपुरा हरतिहरिणी केषां चित्तं न या पि दिवाधुना । ४ । मंदाक्रांता जलधि षडगैर्म्भौ नतौ ताद्गुरू चेत् । ५ । मंदा
क्रांता हरति हृदयं कर्णताटंकयुग्मा प्रोद्यद्रत्नावाकुरतलतलसल्लकंकणाशंखयुक्ता । हारोत्कृष्टा ललित वलयाराववभू
पुराम्पी बिंभ्राणेता यह हृदयं हृद्याह्लादिनी कामिनी वा । ५ । मुनिग्रहकर्णैर्वर्णैर्न्नजभजजलगुरुः कोकिलकं । ६ । कानिमु
खानि षट् । नजभजजलगु इति समाहारद्वंद्वः । इदमवितथं रलोके । नर्कुटकैरलपने । वसुशिवकार्णवैः कोकिल २४
कैरलपरे । हयदशभिर्नर्कुटकमितीतरे ६ । अत्रापठितानि । यशतेरावशाखिनीमतामभा जरैः गुरूपौ । १ । अत्र
दिक्स्वरैर्यतिः । इदं चैत्रलेखलक्ष्मीदुतेल्पपरे । १ । रसयुगहययुक्तौ म्रौ भ्रौ लगौ हयदाहरिः । २ । नवेलीनायुगरस्रयैर्यभौ
नरसालगौ । नसजसयलागुरुर्भवति चेत् तुमालाधरः । ४ । इति । धृतिः । १८ । स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ । १ । २

अर्थाश्वाश्वैर्म्भनयरयुगैरुक्तं मतं केसरं । ४ । अर्थाः पुरुषार्थाश्चत्वारः । ४ । म्रौ तौ म्रौ चेल्ललि
तजिह्मु दितं युगैर्मुनिभिः स्वरैः । ५ । ससजाजभरैर्भवेद्यदि युग्यति विबुधप्रिया । ५ । इदं च
चरीति केचित् । सुधांतकैः स्वकैः भवति स्तुतिर्यामो नसतसाः । ७ । तर्कौः षड् । ७ । वर्णाश्वाश्वैर्म्म
भनततमैः कीर्त्तिता चित्रलेखेयं । ८ । वर्णाश्चत्वारः । ८ । भाद्नन नानतौ भ्रमरपदकमिदमूहितं । १ । भ
शार्दूलं वदमासवद्भूयतिमः सोजसौ मश्चेत् १० । मासा द्वादश । १० । स्याद्भूतर्त्वश्वैर्म्भौ न्सौ विरतिश्चे
त्सिंहविस्फूर्जितं नोमः ११ । मजरावविख्याता स्युर्यतिर्मो मौ नौ मसभाविद्वद्भिः १२ । भवेतीयत्त्रयो
यतौ यो यथा विनासाढ्यवंहः १३ । विलासाद्यवंहः क्रीडाचंडः इत्यर्थः । अतिधृतिः । १९ ।
सूर्याश्वैर्मसजस्ततास्सगुरवः शार्दूलविक्रीडितं । अ पात्रापठितानि । रसर्त्वश्वैर्यौ
न्सौ ररगुरुयुता मेघविस्फूर्जितास्यात् । १ । इदं विस्मितेत्यन्ये । १ । नयुगनलगुरुं निरंतरं य
दासपंचचामरः २ । भूताश्वाश्वैरीते मतनसररगैः कीर्तितं पुष्पदाम । ३ । छत्रीविंबारखं
रास्तुनि तुरगैर्म्रौ न्सौ ततौ चेद्गुरुः । ४ । रसैः षड्भिर्लौ कैर्यमनससजजागुरूर्मकरं
दिका । ५ । युगाश्वाश्वैर्यमनयतजगाः कीर्तितामणिमंजरी । ६ । रसैर्बाणैर्वाताः रुद्र

श्री

रसैरुद्रैर्यो मनसभलागौ गुरुः। ७। गता क्रितुरगैर्जसौ जसतभागश्च समुद्धृतता। न न ज य
साजौ चरचना श्रूलिकक्रु त्रिरत्रश्या। १२। भौ गनौ तौ सगुरू कौ यदि स्यात् छन्दोभाक्व
ध्वकी। १० इति। ।कृतिः। २० शैया: सप्ताश्वषड्भिर्मभ्रस्नजनययुतौ भोगः सुवदना। १।
त्रीर जौ गलौ भवेदिह शैलनन्दरुलैर्ना वृत्तनाम। २। वृत्तनामझ्तामिधं छंदः। त्रिस्त्रि
वीरं। गुरुरधो: क्रमादावृत्त नितिक्रूपार्थः। २। अत्रोपदिते। स्ये स्थैस्यैर्यन्मननतन
जैगिन शो भेयमुक्ता। १। स्वातापूर्वैः सुवंशाय दिनर भनास्त्वव येगा गुरुश्च। २। इति। ।
प्रकृतिः॥ ॥म्रभ्नौ यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयं। १। त्रिवीरं मुनिमि
र्यतियुता। स्वरैस्सप्तमुनिभिश्च यतिरित्यर्थः। अत्रोपदिते। न ज भ ज जैर्गुरुश्च तियुता
त्रिमुनोत्र घतास्मि येऊगौ त्रिप्रकृत्रैरगिभश्च यातारचितेत्येके। पंचकावली। कलां। स्मि
क्षितिपरे। सलिलनिधि रितीतरे। ।इति। ।आकृतिः। २२। भौ वस्नारनाव थगुरु दि २४
गर्कविरमं हि भद्रकमिदं। १। अत्रोपदिष्टानि। सप्तकारकृता मुनिनायदिवी २५

चांतगुरुः कथितामदिरा। १। लालित्यभुतगेंद्वेण माषितमेतच्चेन्मसरस्यजनगुग्भिः। २। सजतानसौ रसैगः फु
ल्लिनुरगहयैः स्यान्महास्रग्धरा रस्या। ३। इति। विकृतिः। २३। यदिह नजौ भतौ भजभला गास्तदश्वललितं हरघे
यतिमत्। मत्ताक्रीडा मौ त्नौ नौ न्लौ गिति भवति वसुशरदशयतियुता। २। अष्टभिः पंचदशभिश्च यतिकार्यमित्यर्थः।
वसुपंचदशकौ इति पिंगलः। इदं वाहनेरसलने २। संकृतिः। २४। न्त्रतमुनी नैर्यति रिह भतनास्मौ भनया श्च यदि
भवति तन्वी। १। अतिकृतिः। २५। क्रौंचपदा भ्मौ स्भौ नननानागाविषुशर वसुमुनिविरतिरिह भवेत्। १। उत्कृतिः। २६।
बस्वीशाश्वच्छेदोपेतं ममनननयुगनरसलगैर्भुजंगविजृंभितं। १। मोनाः षट्सगागिति यदि नवरसरसशति २५
युत मपवाहास्ये रखी। २। इति वृत्तरत्नाकर वृत्तौ समवृत्तप्रकरणे॥ ॥अथ दंडकानामपि समवर्णत्वेचतुष्पादत्व
दितत्वात् तां ध्त्र कृयते। यदिह नयुगलं ततः सप्तरेफास्तदा चंडवृष्टिप्रयातो भवेद्दंडकः। १। इति शिष्यसुबु
द्धिः। इत्स्वादीबोधने इति विश्वः। इयं च सैहापिंगलाद्यभिमतानन्तरात माडव्ययाः। अन्यत्र रात मीड व्याभ्मीरितिस्
त्रात्। प्रति चरण विवृद्ध रेफाः स्युरर्णार्णव्याल जीमूत लीलाकरोद्दाम शंखादयः। २। प्रति दंडकं चरणे
षु विवृद्धा रेफा येषु ते तथोक्ताः। तथा च यस्य दंडकस्य चतुर्ष्वपि पादेषु आदौ नद्वयं ततो ऽष्टौ रगणाः सोऽर्णःस्यात्
यस्य नवरगणाः सोऽर्णव इत्यादिपूर्वं। आदिपदं च पंचदश दिशगण घटितपादः दंडकमारभ्यैकत्रिंशदुत्तर त्रिंश
तरगणघटितपाद दंडकावधि कानां संग्राहकं। तदुक्तं। आसहस्राद्धि वेसाद: षड्विंशत्यक्षराधिकः। लक्ष

वृत्तरत्नटी॥

एंमुनिभिः प्रोक्तैश्चंडवृष्ट्यादिदंडकेइति।इत्थं चपंचविंशत्युत्तरत्रिंशतसंख्याकाः स्युरितिहेयं।२।प्रचितक
समभिधोधीरधीभिः स्मृतोदंडकोनद्वयाद्युत्तरैः सप्तभिर्येः।३।कः स्वार्थे।समभिधानाम।एतन्नाविवक्षि
तं।न द्वयमंतरेणापियावदिच्छं क्रमेण रगणयगणभगणलघुगुरुभावाकेवलं सगणैर्यगणैरगणैर्वाघटि
तानीदंडकानीशेषः प्रचितइतिसूत्रात् प्रचितेतिसामान्यसंज्ञायाइष्टत्वात् सूत्रेशेषशब्देन पूर्वसूत्रेर
गणघटितोक्तेर्यादिघटितनिर्देशः।वृत्तिमत्तुरगकाष्टकादिरचितानामैवेयेसामान्यसंज्ञा।३। ॥
॥ ॥इतित्रैतीयकोध्यायः समवृत्तप्रकाशकः।लतौकृत्यरामस्यभास्करस्यागोश्चरतामगात्।१।अत्रा
ध्यायेसपादद्विचत्वारिंशद्वृत्तानामककलनं चेति।इतिश्रीवृत्तरत्नाकरवृत्तौतृतीयोध्यायः।चतुर्थे
समवृत्तानामन्योन्ययोगसंभवे।...एकादशोत्तीतेसंवेऽस्मभिदामपि।१।अथक्रमप्राप्तान्यर्द्धसमानि वृ
त्तानि लक्षयन्नादावुपचित्रं बोधकत्वार्यो गेनाह।विषमेयदिसौसलगादलेभौयुजिभाद्गुरुकावुपचित्रं।१।
दोधकादिनवतामरसयोर्योगेनाह।भत्रयमोजगतंगुरुणोचेद्युजिचनजौज्यौद्रुतमध्या।२।गुरुणा
गुर्वन्तैरद्वयं।स्वातिमादोधकपोर्योगेनाह।सयुगात्सगुरू विषमेचेद्भाविहवेगवतीयुजिभाद्गौ।३।अ
स्पात्रापातलिकीतः पातित्वेपिविशेषर्थं ज्ञार्थ।मिहोपन्यासः।४।एवमनंतरंवक्ष्यमाणा स्योपद्देष्टमीतः
२६ पातित्वेपिएतदनंतरंवक्ष्यमाणयोश्चापात्नीतपातित्वेपिबोध्यं।२।वानीरामासियोगेनाहो।उ जेत २६

तसौ जरौ गुरुश्चेत्सौ जौ गश्च विराङ्गवेदनोज्ञेया।अद्दे अडविराडितिपिंगलः।तपराविति पंचमीतत्पुरुषः।४।
मालालयोर्योगेनाह।असमेसजौ सगुरुयुक्तौ केतुमती समेभरनगागः।५।इन्द्रवज्रोपेन्द्रवज्रयोराह।आ
ख्यानकीतौ जगुरू गऔ जतजानतौ जगुरुगुरू ग्रतः।६।उपेन्द्रवज्रेन्द्रवज्रयोराह।जतौजगौगोविषमेस
मेस्यात्तोजौगश्चावविपरीतपूर्वा।७।एषेतिविपरीताख्यानकीत्यर्थः।७।उपचित्रद्रुतविलंबितयोराह॥
सयुगात्सलघूविषमेगुरुर्युजिनभौचभरौहरिणप्लुता।८।नंदिमामालयोराह।अयुजिननरलागुरुः
समेन्जमपरवक्त्रमिदंततोजरौ।९।जमितिसमाहारद्वंद्वः।अस्यवैतालीयांतर्गतत्वेप्यनंतरंलक्ष्यमा
णयाश्चोपछंदसिकांतर्गतत्वेपिविशेषसिद्ध्यर्थमिहोपन्यासः।९।प्रमाताप्रमालाकुसुमयोराह।अयुजि
नयुगरेफतोयकारोयुजिचनजौजरगाश्चपुष्पिताग्रा।१०।अद्यानिकामत्तयोराह।स्यादयुग्मकेरजौरजौ
समेचतज्जरौरजौगुरूर्यवासरामतीयं।११।यरात्परामतिर्यवमतीत्यर्थः।अथात्रापहितानि।तत्रनिधान
गणेशयोर्थं।विषमेससजागुरूद्वयंचेत्समरायायुजिमालभारगणस्यात्।प्रोधान्यम्...
यार्यथा।अयुजिननरमाः स्युमासंप्रोक्ता समचरणमतोननौचेज्जरौ।१२।समेतिमज्जमीनत्पुरुषः।
रतिप्रबोधयोर्यथा।सविषमेससजाः गुरुः समेसभरालगौविदितामबोधिता।१३।तोटकदो
धकयोर्यथा।कुलटाविषमेबुधैःमगणैर्नभभौगुरुणायुजिचेद्भुः।१४।अनंतरितविशेषसं
ज्ञायोग्रवक्त्रानिचिह्नयथा।सौलनौविषमेयदिमजजागुरूलंलितासमे।१५।उर्जितपरोजरौजगुरुसमतजौ

हृदयरामभट्टी।

–कीर्त्तिताबुधैरियं। वक्त्रस्यामारोत्तरौ ज सैयुतौ पदे पदे थयुग्मनतरौ जरौ गुरुर्मृगी चपलाकी।७। अयुजि
ननरभाः समके पितु नजुगरयुगलं तथा कौमुदी।८। यदि विषमे भवतो न जौ जरौ सजयाः समे जगुरू सतु
सौरभं।९। इति॥ इतो हृदयरामस्य सुखानंदरूपावशात्।\ तुर्योऽर्धसमवृत्तानामध्यायो विवृतोभवत्॥१॥
अत्राध्याये साद्धाः सप्तश्लोकाः सप्ताक्षराणि चेति॥ \\ इति श्रीवृत्तरत्नाकरविवृत्तौ चतुर्थोऽध्यायः॥४
अथो विषमवृत्तानी सैख्यातानी कपालिभिः। स्वरूपं पंचमध्याये गाथाया आपि लक्षते।१।\ अथ क्रमप्राप्ता
निविषमवृत्तानि लक्षयन्नादौ अनुष्टुब्जगत्सृष्टिकृतिविशेषाणां योगेन घटितं वृत्तं लक्षयति। मुखपादोऽष्ट
भिर्वर्णैः परे स्युर्मकरालयैः क्रमाद्वेदैः। सततं यस्य विद्युच्चित्रपादैः संपन्नसौंदर्यं तदभिहितममलधीभिः
पदचतुरूर्ध्वमिदं वृत्तं।१।\\ यस्य वृत्तस्यातिशेषः। मुखपादं प्रथमपादोऽष्टभिर्वर्णैः परे द्वितीयाद्याश्च त्रयः पादाः
मकरालयैरित्येवशेषः। तथा च चतुर्भिश्चतुर्भिश्चतुर्भिर्वर्णैः क्रमात्प्रतिचरणं वृद्धैरुपलक्षिताः स्युस्तद्वृत्तं नाम
मलधीभिः पदचतुरूर्ध्वमिधं अभिहितमित्यन्वयः। एतदुक्तं भवति। आद्ये पादेऽष्टौ वर्णाः द्वितीये
द्वादश तृतीये षोडश चतुर्थे विंशतिरिति। अस्य च पादाकुलकरीत्या चतुर्विंशतिर्न्नदाबोध्याः॥१॥ अस्यैव स
र्वेष्वपि पादेषु उपांत्यांतयोर्वर्णयोर्नियते गुरुत्वे नामांतरमाह। प्रथममुदितवृत्ते। विरचितविषमचरणभावि
गुरुकयुगलनिधनद्वकलितमापीडः। विधृतरुचिरपदविततियतिरिति भवति पीडः।२। इती चेन्मतिस्त्रा
२७ ङापसर्गेण कलितो युक्तः पीडः आपीडो भवतीत्याद्यान्वयः। इतीतिकिं। प्रथममनंतरं उदितवृत्ते लक्षित २७

वृद्धिरिह पदचतुरूर्ध्वे गुरुकयुगलनिधने सतीति। गुरुकेति विधिपूरणापरो बहुव्रीहिः। स्वार्थे कः। एतद्गुरुवर्णद्वयं अष्टाक्षरमध्येद्व
बोध्यं अन्यथा जक्षम् जकारा सैयुते तिनिर्देशो स्यात्। एतेन च द्वयो गुरुत्वनियमनेन शेषाणां षडादीनां लघुत्वनियमनमपि कैमुतिक
न्यायेनानुगतं बोध्यं। विरचितेत्यादि वृत्ते विषमेषु पादेषु वैषम्येव वर्णानां प्रतिपादं गुरुलघुत्वक्रमनियमस्य स्वैरत्वानियमस्य चा
भावेन नियमः साम्यविरहाच्चेयं। अथैवानुवादमात्रं। विधृतरुचिराआपीडाद्विनी पदावततिः यतिरित्यनेन सापीडेऽर्थकेन यति
स्थाननियमविरहोऽसूचि। अस्यापि प्राग्वच्चतुर्विंशतिर्भेदा ऊह्याः।२।\ अस्यैव चतुर्विंशतिभेदांतर्गतानपि त्रीन्भेदान्विशेषसंज्ञा
र्थं लक्षयति त्रिभिः। प्रथममितरचरणसमृद्धं। प्रथिततजगतिलक्ष्म। इतरदितरगदितमपि यदि चतुर्थं। चरणयुगलकमविकृतमप
रमितिकलिकायाः।३। इतरचरणसमृद्धं परिशेषात् द्वितीयादिरूपद्वयं यस्यापीडस्य प्रथमं तुर्यं विशिष्टमितिलक्ष्म
यतियस्य चेतरत्तुर्यं परिशेषाद्द्वितीयश्चतुर्थांश इतरगदितं प्रथमतुर्योक्तलक्षणमापतितं अपरं चरणयुगलं द्वितीयचतुर्थ
पं अविकृतं यत्प्रथमं वृत्ते नैव पूर्ववन्न अस्तेस्तु तदाऽऽगतिकलिकेति प्रसिद्धेति शेषः। विशेषयोधैर्म्मात्र्यो लिनिर्देशः। अत्रैत
तदुक्तं भवति। यस्य पादस्य स्थाने प्रथमपादनिवेशस्तस्य पादस्य प्रथमपादे व्यवहितपूर्वस्थाने निवेशने इति। तेन निरंतरैव
समार्येयं। एवं प्रथमाद्यस्य पादस्य तृतीयपादस्थाने निवेशः तृतीयपादस्य द्वितीयपादस्थाने। निवेशानुमनुहातर्मितव्यौ।२।
विगुरुयुतसकलवर्णाना। मुखचरणरचितमनुभवति द्वितीयी। चरणमिह हि लक्ष्म प्रकृतमपरमखिलमपि यदि प्रथमतुर्यरूपे
लवलीयायाः।४। यदि मुखचरणरचितं आपीडाद्यपादोक्तं अष्टाक्षरघटितत्वरूपं लक्ष्म द्वकलिकायाः तृतीयश्चरणस्तमनु
भवति। अपरं चाखिलं पादद्वयं भवति प्रथमतुर्यरूपं प्रकृतं अविकृतं। तृतीयपादस्य द्वितीयपादस्थाने पूर्वोक्तरीत्या उक्तला द्वु
योरेवोच्चरितत्वेनाखिलपादद्वयं रतियुक्तमुक्तं। इयं पिंगलेन मंजरी उक्ता। अत्र वृत्तिमिति अतः आद्यः पादः षोडशार्णो। द्विगु

विलासिब्रूपकघनी ।४। प्रथममधिवसति यदि तुर्यं चरमचरणपदमवापि तिगुरुयुग्मा । निखिलमपरमुपरितनसममिह
विलसितपादत्रितयममृतधारा ।५। यदि प्रथमे तुर्यं आद्यः पादः चरमचरणस्य पदं स्थानं अधिवसति । उपान्त्यपादद्वयपा
दमिति कर्मणि । अपरं चाखिलं त्रयमथ्येतत्पादानामुपरितनं समं आपीडस्य पादोपरितनपादत्रयतुल्यं स्यात् तदाऽमृतधा
रास्यादित्यन्वयः । अत्र विलसितादिलक्षणादिक्षु विशेषणी श्लोकपूर्वार्धे । अत्रापि द्वित्रिमते आद्यः पादः विंशत्यर्णैः इन्द्रपद
चतुरूर्ध्वभेदाना मापीडादिविपर्यासे तुर्यादिविशेषेण बोध्या । तत्रापि वृत्तिमते आद्यः पादो लवल्पी षोडशार्णोऽ
मृतधारायां विंशत्यर्णश्च । अत्राद्यन्तेवाद्यंतयोरन्वत्प्रतिपादं गुरुद्वययोगप्रलापीऽ इति पिङ्गलः । अथ्यामन्यपि चतु
र्विंशतिप्रकारा ज्ञेयाः ।५। ॥ इति श्रीवृत्तरत्नाकरविवृतौ षट्चतुरूर्ध्वप्रकरणं । अथ पंक्ति त्रिष्टु उद्गती विशेषणोली
ढीकरेणाघटितामुद्गतीलक्षयति । सजसादिमे सलघुकौ च नसजगुरुकैरथोद्गता । अथ हिमगतन्गानजजागयुताः सजसा सगौ चर
णमेकतः पठेत् ॥१॥ यसवृ॰ तस्यादिमे पादे सजसगणाः समाहारादेकवचनं सलघुकौ सगणो लघुश्च सगु । स्वार्थे कः । अथा
नन्तरं द्वितीयपादे नसजगुरुकैरुपलक्षितः स्यात् अथ हिमगतनजनजगयुताः सुस्तदूतमुद्गतानामस्यात् । अथेति
नन्तरं द्वितीयपादे न सजगुरुकैरूपलक्षितः स्यात् अथ हि गतनन्ज ... ... अत्र विशेषमाह चरण
त्रिपुरलो हि स्त्री हि रिन्तु तरपद लोपी समासोन्तरं द्वितीयास्मिते वादिनादितीनात्तत्पुरुषः । अत्र विशेषमाह चरण
मिति । प्रथममिति पूर्वतोऽनुवर्तनीयं । एकतः इति ल्यब्लोपे पञ्चमी । तथा च प्रथमे चरणे अर्थात् द्वितीयेन सहैकविधापपठ
 तु । आद्यपादद्वितीयेन सहाविलंबेन पठन्नलक्षितविच्छेदेन सपं ।१। चरणत्रयेन्नजतिलकयद्विसकलमुद्गतागतौ ।
 नौ भगौ भवति सौरभके चरणे यदीह भवतस्तृतीयके ।२। चरणत्रयं आद्यद्वितीयचतुर्थरूपं तृतीये विशेषोपादानात् ।



यदि द्वितीये चरणे रनौ भगौ च भवतस्तदेहशास्त्रे सौरभके भवतीत्यन्वयः । सकलमिति लक्ष्मविशेषको नूतनरणे कृतरसपिकु
चिते । रनयुगं सकारयुगलं च भवति चरणे तृतीयके । तद्दितमुरुमतिभिर्लक्षितं यदि शेषमस्य खलु पूर्वतुल्यकं ।३। यद्यस्य ललि
तस्य शेषं आद्यद्वितीयचतुर्थरूपं पादत्रयं सौरभकेण तुल्यकं भवतीत्यन्वयः । इति वृत्तरत्नाकरविवृतावुद्गताप्रकर
णं । अथ यवकरी अतिजगती बृहत्तिशक्वरी विशेषणी सैकरेणाह । अथो स्नौ गौ प्रथमो हि रेकन : पृथगन्यत् । त्रितयं मनज
रगास्ततो नसा : त्रिन परिकलितं यो प्रचुपित मिदमुपस्थितं पूर्वं ।१। यद्युपचतुष्पिपादे क्रमात् स्नौ ज्नौ गौ मसज भगा गुर
वः पनजरगा नजसा : नत्रय युग्ज ज या श्च स्युरिदं तत्तत्तु उपस्थितप्रचुपितं उपस्थितप्रचुपितं स्यात् ॥ यो ऽविकल्पादि
दमर्थमीरत्नपशुपतीशानि खिलं नवद्युः । आत्मपरूपपरिपूरितजगल्पपानिलक्ष्म खिनः कुतो भयैस्तापादिमूर्ध्वमत ... 
घलपदरनादिदं तद्वितियुक्तमुक्तं । अत्र विशेषमाह प्रथमो हि रिति । प्रथमो हि रेकतः केवलः पठनीयः न तु पूर्ववत् । द्वि
तीयेन सहैकविधायेत्यर्थः । तस्य सप्तपूर्वं तेनान्यत् द्वितीयतृतीयतुर्याणि रूपं त्रितयं पृथगिति न्नौ भि नौ स्वीत विछेदयुक्तं
पठनीयेन तूद्गताद्यो हि वहेको रूपे तदर्थः प्रतिपाद्यं तैयति : कार्यं ति सौ हर्मार्थः । अत एव पृथगाद्यैरिति विशेषैर्वक्ता
सूत्ररूता ... शेषो हि त्रयं यतिः सर्वत्र पादान्ते श्लोकार्धेनु विशेषतः इति ... शास्त्रो रूपातिमहितुके । पृथगा
द्यमिति तु उद्गतामेकत इति शीकानिरासार्थं इति वृद्धाः हृन्तिरूता पितपे वो तु नतु अन्यपादत्रये एको रूपपाठो ऽस्तु
के । तेन पृथगित्यस्य प्रथमपादे कार्यं भिन्नार्थ परत्वमेगी रूमान्यत्रितयं एको रूपपठनीयं इति व्याख्याने पिंगल
विरोधात् इति विरोधात् । नौ पादे श्च तृतीयके सनौ मसयुक्तो प्रथमो हि रूतयती हवर्द्धमानो । त्रितयमपरस्य पिपूर्वस्तदशानि

इति । यतिस्त्विति
हृभवति । प्रतत्तमतिभिरितिगारितैरवलनुवृत्तौ । २ । अथनगणद्वयानंतरं । इह शास्त्रे वर्द्धमाने खलु नामस्ति गदितौ
पाठीतरे आगमानुशासनमनित्यमिति तुगभावमा । निसप्रथमी हि कृतयायलात्सूयतेतदित्यर्थः । यत्तु अत्र नु इति भिन्नं पदं बु
धापूर्वपदस्यपुल्लिंगत्वं । लिंगान्यतरत्वेनानलत्वमाशी ... प्रवर्द्धमानमिति पाठभाष्ये लोपाठापानिवबोधो ... शालिनउपेन्द्रा ।
सूत्रात्पादुपसर्गपूर्वकसंज्ञानाभिधानात् । २ । अस्मिन्नेव तृतीयके यदिति । ३ । स्पष्टः । प्रथमे च विरतिरार्षभे ब्रुवेति । तत्र शुद्धविरा
डुपसर्गपूर्वकसंज्ञानाभिधानात् । २ । अस्मिन्नुपस्थितप्रचुपितं । प्रथमे च विरतिरिति चरणमेकतरस्य
दूरस्थितौ । त्रितयमपरमपि यदिस्ति समं स्यात् । ३ । ... शेषं तु यथासामान्यशास्त्रे । तत्त्वदार्थः । शुद्धविराडिति पदस्याग्रे स्थिते आर्षभे शुद्ध
मंडूकप्लुतानुवृत्तिशंकानिवृत्त्यर्थं । शेषं तु यथासामान्यशास्त्रे ...
विराडार्षभं स्यात् । इदं पिंगलेन शुद्धविराडृषभं इत्युक्तं । इति श्रीवृत्तरत्नाकरविवृतौ उपस्थितप्रचुपितप्रकरणं ॥ ॥
विराडार्षभं स्यात् । इदं पिंगलेन शुद्धविराडृषभं इत्युक्तं । यच्छंदोनोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तं । ४ । पा
वा अथ ग्रंथन्यूनतापरिहरति । विषमाक्षरपादं पादैरसमं दशधर्मवत् । यच्छंदो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तं । ४ । पादा यस्य तत् । न चैवं
देषु मिथो गुरुलघुक्रमनियमसाम्याभावात् संख्यासाम्याभावाच्च विषमाक्षराणि येषु ता दशधा पादा यस्य तत् । न चैवं
षष्ठ्यंत्र अक्षराणीति चतुरादिसमसंख्याभावात् । तथा चामूले प्रथमद्वितीयतृतीयपादयोरष्टदशाक्षरत्वेऽपि विद्यानिः । ॥ २९ ॥
वाथवादशानां मत्तादीनां धर्मो विहिताविहितात्मना उक्तो यस्मिन् दृष्टसितदशधर्मंतद्धृतपादैः केनचित्कृतेनास
दृशी अन्येषीवत् स्यादत्वादस्य न त्रिपैनबसा ... यच्छंदो नोक्तमिति प्रथमविकल्पस्य पञ्चतुरूपं दृति व्याप्तिनिरा
सः । अत्र प्रथमविकल्पोदाहरणमूल एव । द्वितीयविकल्पे यथा कृतं दशधर्मं ... दशधर्मं न जानाति धृतरा
ष्ट्रनिबोधतान् । मत्तः प्रमत्तउन्मत्तः श्रांतः क्रुद्धो बुभुक्षितः । त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश । २ । मत्तो गर्वा

दिना प्रमत्तो मद्यादिना । उन्मत्तो ग्रहवातादिना । अस्य च पादत्वात्पादेरसमं इत्यस्योदाहरणत्वं । २ । इदं च जातिवृत्ता
त्मनाद्विविधमपि वेदेषु स्तेनके ... संस्कृतविषयं किंतु प्राकृतदेशीयभाषास्वपि कवीन्द्रैः ... स्यादिति । इति
हृदयरामस्य सुखबोधन पाठशात् । पंचमोऽसमवृत्तानां अध्यायो विवृतो भवत् । १ । अत्राध्याये ग्रंथसंख्या ॥
सार्द्धविंशतिश्लोका इति ॥ ॥ इति श्रीवृत्तरत्नाकरविवृतौ पंचमोऽध्यायः ॥ ५ ॥ छ ॥ ... षट्प्रस्तारमुखा
नां प्रत्ययानामुदीर्यते । प्रस्तारं ... ग्रंथप्रामाण्याकांक्षिणां । नन्वेतेषां वृत्तानां स्वरूपभेदसंख्याप्र
माणं कं किंचिदस्ति न वा । आद्यकृतो नोक्तं ... प्रस्तारो नष्ट
मुद्दिष्टमेकद्व्यादि लघुक्रिया । संख्यानमध्वयोगश्च षडेते प्रत्ययाः स्मृताः इति षट्प्रत्ययान् क्रमेणलक्षय
ति । पादे सर्वगुरावाद्यात् लघुं न्यस्य गुरोरधः । यथोपरि तथाशेषं भूयः कुर्यादमुं विधिं । ऊने दद्याद्गुरूनेव
यावत्सर्वलघुर्भवेत् । प्रस्तारोयं समाख्यातश्छंदोविचितिवेदिभिः । २ । ... पादे सर्वगुरौ दे
लिखिते आद्यागुरोरधः स्थले लघुं न्यस्य शेषं ... यथोपरि तथा न्यसेत् । एवं ... यादि
स्वोपरितनादिगुर्वधःस्थितलघोः पूर्वं ... विशेषमाह । ऊनेति । लघोः पूर्वं ... उपरितन ...
न्यूनत्वे सति गुरूनेव दद्यात् । इत्यमुं विधिं भूयोभूयः कुर्यात् यावत्प्रस्तारः सर्वलघुर्भवेत् इ
ति व्यवहितान्वयेन भूयः पदावृत्त्या चावर्त्यं । प्रस्तारः किं निःगमयति । अर्थः इति । अर्थः प्रस्तो
ररसलाइनुषंगः । विचितिः शास्त्रं । इदं उक्तात्युक्तयोः ... तत्रोक्तायां । अत्युक्तायां । मध्यायां ।

इति वर्णप्रस्तारः। अथ क्रमप्राप्तं नष्टमाह। नष्टस्य यो ... स्यार्धे ऽर्धे समे च लः। विषमे चैकमा
दायतदर्धेऽर्धे गुरुर्भवेत्। ३। अथा॥ छन्दसः SS प्रथम SSS द्वितीयादिस्थाने कीदृक्रूपं प्र
श्ने नष्टे कर्तव्ये पृष्टभेदस्यायो कस्तस्यार्धेऽर्धे समे द्वितीय ISSS रादिरूपं चेत्स्यात्तदा लो लघुः
स्थाप्यः। यदि तु विषमं एक आदिरूपं तदा एकमधिकं आदा SIS यार्धेऽर्धे समे ऽलगुरुर्भवेत् स्था
प्य इत्यर्थः। अर्धशब्दो ह्यसाकरणेनो नः पुनरुक्तमे। ए IIS तद्गुरुर्भवति। पृष्टभेदसंख्या
मर्धीकृत्य लघुं न्यसेत्। यदि तु विषमत्वेनार्धयितुं शक्यते SSI तदा तत्संख्या विषमसंख्यायामेक
मधिकं प्रक्षिप्य ततोऽर्धीकृत्य गुरुं न्यसेत्। ततोऽर्धमप्यर्धीकृत्य ISI लघुं न्यसेत् यदि तदप्यर्ध
तुं न शक्यते तत्रापि एकमाधाय गुरुं न्यसेत्। ततोऽर्धीकृत्य SII मप्यर्धीकृत्य लघुं न्यसेत् यदि तु
दप्यर्धयितुं न शक्यते तत्रापि एकमधिकं प्रक्षिप्य ततो III र्धीकृत्य गुरुं न्यसेत्। एवं भूयो भू
यः कुर्याद्यावत्पृष्टवृत्तस्याक्षरपूर्तिरिति। यथानुष्टुभः षष्ठे भेदे पृष्टे ऽन्त्य संख्यामर्धीकृत्य लघुं न्य
सेत् ततोऽवशिष्टा त्रिसंख्या विषमत्वादर्धयितुं न शक्यते ऽतस्तत्रैकं प्रक्षिप्यार्धीकृत्य गुरुं संस्था
पयेत्। ततो लघुं न्यसे
त्। ततो ... येत् ततो गुरुं न्यसेत्। ततो द्विसंख्यावशिष्यते पुनस्तामर्धयेत् ततो लघुं न्यसे ३०
त् तत्रैकसंख्यावशिष्यते तत्रापि पूर्ववारे एकैकं प्रक्षिप्यार्धीकृत्य पंचगुरून्न्यसेत् इत्येवं



लघुरेकं ISISSSSS जातं रूपं षष्ठं ततो हीनोत्तरं। यत्तु सप्तमं पृष्टं भवति तत्संख्याया विषमत्वे
नार्धयितुमशक्यत्वादेकं प्रक्षिप्यार्धीकृत्य गुरुं न्यस्यावशिष्टाश्चतुरोऽर्धीकृत्य लघुं न्यस्यावशि
ष्टावर्धीकृत्य लघुं न्यस्यावशिष्ट एकस्मिन् पंचवारमेकैकं प्रक्षेपेण पंचगुणरूपं न्यसेत्।
तथा चैवं SIISSSSS ... जातं रूपं सप्तमं इत्युत्तरं। एवं सर्वत्रापि तत्पद्यं विज्ञेयं ॥ २। अथ क्रमप्राप्तमुद्दि
ष्टमाह। उद्दिष्टे द्विगुणानाद्यादुपर्यंकान्समालिखेत्। लघुस्थायेतु तत्रांकास्तैः सैकैर्मिश्रितैर्भवे
त्॥ ४। एतद्वृत्तस्य दर्शितरूपं कतिथमिति पृष्टे तद्रूपस्याद्यादारभ्य सर्वेषां उपरि आद्यादिस्थावृत्ता
धर्मक्रमारभ्य द्वितीयादिषु स्वस्वपूर्वांकापेक्षया द्विगुणानंकान् विनिवेशयेत्। तत्रोपरिलिखितेष्वंके
षु येंका लघुस्थास्तैर्मिलितैर्मिलितैः सैकैरेकाधिकयुक्तैर्मितैरुद्दिष्टं भवेत्। मेलनसैकीकर
णाभ्यां यावतियोंको जायते तावतिथं तद्रूपं इत्युत्तरं। यथा चतुरक्षरस्य १२४८ ISIS अत्र लघुस्थौ द्वौ एक च
तुर्भिर्मिलितैः पंचभिरेकाधिकयुक्तैः षड्भिर्मितं षष्ठं रूपं। ६। एकाद्य ... कोत्तरा अंका वामस्था
आद्याः क्रमस्थितैः परः पूर्वेणांकेन गुणितः तत्परस्तेन तेन चाति भास्कराचार्योक्तप्रकारेण बहुप्रयासमाध्य
त्वादुपेक्ष्य सुगमप्रकारेण द्वे द्वसौ गुरु लघुसंख्याज्ञानोपायमाह। वर्णान्वृत्तभवान्सैकान्गौत्तराद्यय
तः स्थितान्। एकादिक्रमतश्चैतानुपर्युपरि निक्षिपेत्। ५। उपान्त्यतो निवर्तेत त्यजेदेकैकमूर्ध्वतः।

उपर्याद्याङ्कुरोरेवमेकद्यादिलघुक्रिया।६। अमुष्मिन्नुद्दिष्टमिलच भेदाः क्रियंत इति प्रश्ने तद्वृत्तपादवर्ण संख्याकानेकोकानेकाधिकान् उत्तराधरभावेन स्तंभवद्दिलघुः।स्थितान् कल्पयति। चापरं एता न्स्थापिते कोकानेकाद्यादिक्रमेणोपर्युपरि निःक्षिपन्मेलयेत् इत्थं चेत्स्वपूर्वे लोपी मत उपीते मेलयित्वा नतूपात्तेनापि मेलयित्वा निवर्तेते विरमेत्। इत्थं चैकैकाङ्कधृतस्तत्तोरे आद्यभावः। इष्ट वृत्त पादवर्णसंख्यातएकाधिका एकीकात्रधोधः स्थाप्यास्तत्रैकोकेनोपीतैकीकै द्यौके भाव येत्तेन चर्द्वौकेन स्वोपरिस्थे कोकेत्र्यंके एवमुत्तरोत्तरेऽपाद्यपर्यंतं भावयित्वा आद्यकोके लप्ता पुनरपि त्यैकीकेनोपीत द्यौके त्र्यंके भावयेत् तेन च त्र्यंकेन स्वोपरिस्थे त्र्यंके षडंके भावयेद्दत्तु पाद्याधस्तनपर्यंतं कृत्वोपाद्यैत्यक्त्वा पुनरप्येवं त्यैकीकेनोपीत त्र्यंके चतुरंकं भावयेत्तेन च चतुरंके नस्वोपरिस्थे दशांके एवं उपाद्याधःस्थाधस्तनपर्यंतं कृत्वोपाद्याधःस्थितत्यक्त्वा पुनरप्येवं कुर्या देवं वोपीतत्सागावधिकार्यं। यथा गायत्री कासंख्यकः सर्वगुरुस्तैस्तत्रैव द्योधोकस्तै लघुभेदा ज्ञेयाः। एवं विपरीतमप्यतिभैकां भेदे प्रकल्प्योपर्युपर्येकसंख्याकाएकद्यादि

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १ | २ | २ | २ | २ | २ | २ | |
| १ | ६ | ६ | ६ | ६ | ६ | ६ | |
| १ | ५ | २५ | २५ | २५ | २५ | २५ | |
| [illegible] | ४ | १०२ | २० | २० | २० | २० | |
| [illegible] | [illegible] | ६ | २५ | २५ | २५ | २५ | |
| १ | २ | ३ | ४ | ५ | ६ | ७ | |
| १ | १ | १ | १ | १ | १ | १ | |

अत्रचसर्वेपि ये संख्याया एकद्यादिकसंख्यैसर्वलघुरूभेदा अप्यवगंतव्याः। ३१

इत्येकद्यादिलघुक्रिया।८। अथ क्रमप्राप्तां वृत्तभेदसंख्यामुपायेनाह। लघुक्रियांकसंदोहे भवेत्संख्या विमिश्रते। उद्दिष्टांकसमाहारः सैकोवाजनयेदिमां।७। संदोहः समूहः। मिश्रितएकीकृते। सर्वैरंकैः संभूयांकः सा सा संख्येत्यर्थः। समाहारो मेलनं। इमां संख्यां तैः सैकेर्योकिः सा संख्येत्यर्थः। एवमुक्तयोरे न्यतमप्रकारेण्कृते उक्ताद्युत्कृत्यंतासु सवृत्तेषु भेदसंख्या यथा। तत्र तावदुक्तायाः।२। अत्युक्तायाः।४। मध्यायाः।८। प्र तिष्ठा१६। सुप्र०३२। गाय०६४ उष्णि०१२८। अनु०२५६। बृह०५१२। पंक्तेः१०२४। त्रिष्टु०२०४८। जग०४०९६। अतिजगति ८१९२। शक्व०१६३८४। अतिश०३२७६८। अष्टी ६५५३६। अत्यष्टि०१३१०७२। धृतेः२६२१४४। अतिधृ०५२४२८८। कृतेः१०४८५७६। प्रकृ०२०९७१५२। आ०४१९४३०४। विकृ०८३८८६०८। संकृ०१६७७७२१६। अतिकृ०३३५५४४३२। उत्कृ०६७१०८८६४ इति। एतैः षड्विंशच्छंदसां सभभेदैः संभूयजा तासंख्या१३४२१७७२६ इति। अत्रमामकः संग्रहश्लोकः। रसनेत्राद्रिमुनिनागाब्धिदस्त्राब्धिशिखीदृक्। भेदाः परस्परैर्योगे षड्विंशच्छंदसां समाइति। अत्र भास्कराचार्यैस्तु प्रकारांतरमप्युक्तं। पादाक्षरमि तिगच्छे गुणवर्गफलं च ये द्विगुणे। समवृत्तानां संख्यातद्वर्गोविषमवर्गश्च। स्वस्वपदोनो स्यातीमधसि समार्धे ते वर्गाः। ग्रच्छहृयीतमुक्तात् व्यस्तं गुणवर्गजं फलं यत्तत्। इति। इति संख्याने।७। अथ क्रमप्राप्तमध्वयोगमाह। संख्यैव द्विगुणैकोना सद्भिरध्वाप्रकीर्तितः। वृत्तस्पीगुर्जितो व्याप्ति

हृदयरामकृतौ [illegible]
रम्यां [illegible] इति श्रीभट्टकेदारकृते वृत्तरत्नाकरे [illegible]
रधः कुर्यात्तथौगुलौ ।८। अत्रोदाहरणं यथा। उक्तायां भेदसंख्यायां द्विरूपासां [illegible]
स्त्रीगुल प्रस्तारमार्ग इति। एवमन्यत्रापूह्यं। नन्वेतां वृद्धिं निःसीमां तमनस्कं प्रत्ययं प्रतिमाह। वृ
त्तस्येति। वृत्तप्रस्तारस्य [illegible] भूमिमंगुलविस्तृतां कुर्यात्तथा द्वितीयां [illegible] तरालार्थं
अंगुलोयाममभूमिमधः पूर्णां कुर्यादित्यर्थः। एवं च प्रस्तारव्याप्ता भूमिः पूर्वा [illegible] घटते इत्याभि
संधिः। अत्र ध्वयोगः ।८। एवं च [illegible] यरख्याति भाविषु वर्णेष्वर्थं निगमयति। वंशे भू
रूपस्य प्रकटगुणगणः शैवसिद्धांतवेत्ता विप्रः पिंगेकनामा विमलतरमतिर्वृत्तलार्थबोधे
केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्तश्चक्रे [illegible] नामिरामं प्रविरचितमिदं वृत्त
रत्नाकराख्यं।२। वंशे गोत्रे। [illegible] षष्ठी समास
निषेधात्। न च तत्र [illegible] योगेन लोकाव्ययनिष्ठा खलर्थ [illegible] षष्ठी निषेधात् [illegible] षष्ठी
कथं षष्ठी समास इति वाच्यं [illegible] मिति वक्तव्ये [illegible] बंधानि देशेन
[illegible] लक्षणेन न लोकेति षष्ठी निषेधस्यानित्यत्वज्ञापनात्। अन्यथा व्यावृत्तेः प्रयुक्ति [illegible]
[illegible] षष्ठी निषेधात् [illegible] बंधपदे [illegible] इत्युपपत्तिः। अत एव [illegible] ३२
[illegible] षष्ठीसमासः। [illegible] हृदयराम [illegible]